श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे

# ॥ एकोननवतितमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ एकोननवतितमः सर्गः ॥

## विभीषणस्य रक्षःसु प्रहारस्तेन वानरयूथपानां प्रोत्साहनं लक्ष्मणेनेन्द्रजितः सारथेर्वधो वानरैस्तदीयानामश्वानां विनिपातनम्

युध्यमानौ ततो दृष्ट्वा प्रसक्तौ नरराक्षसौ।
प्रभिन्नाविव मातङ्गौ परस्परजयैषिणौ॥ **6.89.1** ॥

तयोर्युद्धं द्रष्टुकामो वरचापधरो बली।
शूरः स रावणभ्राता तस्थौ सङ्ग्राममूर्धनि॥ **6.89.2** ॥

ततो विस्फारयामास महद् धनुरवस्थितः।
उत्ससर्ज च तीक्ष्णाग्रान् राक्षसेषु महाशरान्॥ **6.89.3** ॥

ते शराः शिखिसंस्पर्शा निपतन्तः समाहिताः।
राक्षसान् द्रावयामासुर्वज्राणीव महागिरीन्॥ **6.89.4** ॥

विभीषणस्यानुचरास्तेऽपि शूलासिपट्टिशैः।
चिच्छिदुः समरे वीरान् राक्षसान् राक्षसोत्तमाः॥ **6.89.5** ॥

राक्षसैस्तैः परिवृतः स तदा तु विभीषणः।
बभौ मध्ये प्रधृष्टानां कलभानामिव द्विपः॥ **6.89.6** ॥

ततः सञ्चोदमानो वै हरीन् रक्षोवधप्रियान्।
उवाच वचनं काले कालज्ञो रक्षसां वरः॥ **6.89.7** ॥

एकोऽयं राक्षसेन्द्रस्य परायणमवस्थितः।
एतच्छेषं बलं तस्य किं तिष्ठत हरीश्वराः॥ **6.89.8** ॥

अस्मिंश्च निहते पापे राक्षसे रणमूर्धनि।
रावणं वर्जयित्वा तु शेषमस्य बलं हतम्॥ **6.89.9** ॥

प्रहस्तो निहतो वीरो निकुम्भश्च महाबलः।
कुम्भकर्णश्च कुम्भश्च धूम्राक्षश्च निशाचरः॥ **6.89.10** ॥

जम्बुमाली महामाली तीक्ष्णवेगोऽशनिप्रभः।
सुप्तघ्नो यज्ञकोपश्च वज्रदंष्ट्रश्च राक्षसः॥ **6.89.11** ॥

संह्रादी विकटोऽरिघ्नस्तपनो मन्द एव च।
प्रघासः प्रघसश्चैव प्रजङ्घो जङ्घ एव च॥ **6.89.12** ॥

अग्निकेतुश्च दुर्धर्षो रश्मिकेतुश्च वीर्यवान्।
विद्युज्जिह्वो द्विजिह्वश्च सूर्यशत्रुश्च राक्षसः॥ **6.89.13** ॥

अकम्पनः सुपार्श्वश्च चक्रमाली च राक्षसः।
कम्पनः सत्त्ववन्तौ तौ देवान्तकनरान्तकौ॥ **6.89.14** ॥

एतान् निहत्यातिबलान् बहून् राक्षससत्तमान्।
बाहुभ्यां सागरं तीर्त्वा लङ्घितं गोष्पदं लघु॥ **6.89.15** ॥

एतावदेव शेषं वो जेतव्यमिति वानराः।
हताः सर्वे समागम्य राक्षसा बलदर्पिताः॥ **6.89.16** ॥

अयुक्तं निधनं कर्तुं पुत्रस्य जनितुर्मम।
घृणामपास्य रामार्थे निहन्यां भ्रातुरात्मजम्॥ **6.89.17** ॥

हन्तुकामस्य मे बाष्पं चक्षुश्चैव निरुध्यति।
तमेवैष महाबाहुर्लक्ष्मणः शमयिष्यति॥ **6.89.18** ॥

वानरा घ्नत सम्भूय भृत्यानस्य समीपगान्।
इति तेनातियशसा राक्षसेनाभिचोदिताः॥ **6.89.19** ॥

वानरेन्द्रा जहृषिरे लाङ्गूलानि च विव्यधुः।
ततस्तु कपिशार्दूलाः क्ष्वेडन्तश्च पुनः पुनः।
मुमुचुर्विविधान् नादान् मेघान् दृष्ट्वेव बर्हिणः॥ **6.89.20** ॥

जाम्बवानपि तैः सर्वैः स्वयूथ्यैरभिसंवृतः।
तेऽश्मभिस्ताडयामासुर्नखैर्दन्तैश्च राक्षसान्॥ **6.89.21** ॥

निघ्नन्तमृक्षाधिपतिं राक्षसास्ते महाबलाः।
परिवव्रुर्भयं त्यक्त्वा तमनेकविधायुधाः॥ **6.89.22** ॥

शरैः परशुभिस्तीक्ष्णैः पट्टिशैर्यष्टितोमरैः।
जाम्बवन्तं मृधे जघ्नुर्निघ्नन्तं राक्षसीं चमूम्॥ **6.89.23** ॥

स सम्प्रहारस्तुमुलः सञ्जज्ञे कपिरक्षसाम्।
देवासुराणां क्रुद्धानां यथा भीमो महास्वनः॥ **6.89.24** ॥

हनूमानपि सङ्क्रुद्धः सालमुत्पाट्य पर्वतात्।
स लक्ष्मणं स्वयं पृष्ठादवरोप्य महामनाः॥ **6.89.25** ॥

रक्षसां कदनं चक्रे दुरासादः सहस्रशः।
स दत्त्वा तुमुलं युद्धं पितृव्यस्येन्द्रजिद् बली॥ **6.89.26** ॥

लक्ष्मणं परवीरघ्नः पुनरेवाभ्यधावत।
तौ प्रयुद्धौ तदा वीरौ मृधे लक्ष्मणराक्षसौ॥ **6.89.27** ॥

शरौघानभिवर्षन्तौ जघ्नतुस्तौ परस्परम्।
अभीक्ष्णमन्तर्दधतुः शरजालैर्महाबलौ॥ **6.89.28** ॥

चन्द्रादित्याविवोष्णान्ते यथा मेघैस्तरस्विनौ।
नह्यादानं न सन्धानं धनुषो वा परिग्रहः॥ **6.89.29** ॥

न विप्रमोक्षो बाणानां न विकर्षो न विग्रहः।
न मुष्टिप्रतिसन्धानं न लक्ष्यप्रतिपादनम्॥ **6.89.30** ॥

अदृश्यत तयोस्तत्र युध्यतोः पाणिलाघवात्।
चापवेगप्रयुक्तैश्च बाणजालैः समन्ततः॥ **6.89.31** ॥

अन्तरिक्षेऽभिसम्पन्ने न रूपाणि चकाशिरे।
लक्ष्मणो रावणिं प्राप्य रावणिश्चापि लक्ष्मणम्॥ **6.89.32** ॥

अव्यवस्था भवत्युग्रा ताभ्यामन्योन्यविग्रहे।
ताभ्यामुभाभ्यां तरसा प्रसृष्टैर्विशिखैः शितैः॥ **6.89.33** ॥

निरन्तरमिवाकाशं बभूव तमसा वृतम्।
तैः पतद्भिश्च बहुभिस्तयोः शरशतैः शितैः॥ **6.89.34** ॥

दिशश्च प्रदिशश्चैव बभूवुः शरसङ्कुलाः।
तमसा पिहितं सर्वमासीत् प्रतिभयं महत्॥ **6.89.35** ॥

अस्तं गते सहस्रांशौ संवृते तमसा च वै।
रुधिरौघा महानद्यः प्रावर्तन्त सहस्रशः॥ **6.89.36** ॥

क्रव्यादा दारुणा वाग्भिश्चिक्षिपुर्भीमनिःस्वनान्।
न तदानीं ववौ वायुर्न च जज्वाल पावकः॥ **6.89.37** ॥

स्वस्त्यस्तु लोकेभ्य इति जजल्पुस्ते महर्षयः।
सम्पेतुश्चात्र सन्तप्ता गन्धर्वाः सह चारणैः॥ **6.89.38** ॥

अथ राक्षससिंहस्य कृष्णान् कनकभूषणान्।
शरैश्चतुर्भिः सौमित्रिर्विव्याध चतुरो हयान्॥ **6.89.39** ॥

ततोऽपरेण भल्लेन पीतेन निशितेन च।
सम्पूर्णायतमुक्तेन सुपत्रेण सुवर्चसा॥ **6.89.40** ॥

महेन्द्राशनिकल्पेन सूतस्य विचरिष्यतः।
स तेन बाणाशनिना तलशब्दानुनादिना॥ **6.89.41** ॥

लाघवाद् राघवः श्रीमाञ्शिरः कायादपाहरत्।
स यन्तरि महातेजा हते मन्दोदरीसुतः॥ **6.89.42** ॥

स्वयं सारथ्यमकरोत् पुनश्च धनुरस्पृशत्।
तदद्भुतमभूत् तत्र सारथ्यं पश्यतां युधि॥ **6.89.43** ॥

हयेषु व्यग्रहस्तं तं विव्याध निशितैः शरैः।
धनुष्यथ पुनर्व्यग्रं हयेषु मुमुचे शरान्॥ **6.89.44** ॥

छिद्रेषु तेषु बाणौघैर्विचरन्तमभीतवत्।
अर्दयामास समरे सौमित्रिः शीघ्रकृत्तमः॥ **6.89.45** ॥

निहतं सारथिं दृष्ट्वा समरे रावणात्मजः।
प्रजहौ समरोद्धर्षं विषण्णः स बभूव ह॥ **6.89.46** ॥

विषण्णवदनं दृष्ट्वा राक्षसं हरियूथपाः।
ततः परमसंहृष्टा लक्ष्मणं चाभ्यपूजयन्॥ **6.89.47** ॥

ततः प्रमाथी रभसः शरभो गन्धमादनः।
अमृष्यमाणाश्चत्वारश्चक्रुर्वेगं हरीश्वराः॥ **6.89.48** ॥

ते चास्य हयमुख्येषु तूर्णमुत्पत्य वानराः।
चतुर्षु सुमहावीर्या निपेतुर्भीमविक्रमाः॥ **6.89.49** ॥

तेषामधिष्ठितानां तैर्वानरैः पर्वतोपमैः।
मुखेभ्यो रुधिरं व्यक्तं हयानां समवर्तत॥ **6.89.50** ॥

ते हया मथिता भग्ना व्यसवो धरणीं गताः।
ते निहत्य हयांस्तस्य प्रमथ्य च महारथम्।
पुनरुत्पत्य वेगेन तस्थुर्लक्ष्मणपार्श्वतः ॥ **6.89.51** ॥

स हताश्वादवप्लुत्य रथान्मथितसारथिः।
शरवर्षेण सौमित्रिमभ्यधावत रावणिः ॥ **6.89.52** ॥

ततो महेन्द्रप्रतिमः स लक्ष्मणः
पदातिनं तं निहतैर्हयोत्तमैः।
सृजन्तमाजौ निशिताञ्छरोत्तमान्
भृशं तदा बाणगणैर्व्यदारयत् ॥ **6.89.53** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे एकोननवतितमः सर्गः ॥